# શ્રીહનૂમચ્ચતુર્વિંશતિઃ

Shri Hanumachchaturvimshatih

sanskritdocuments.org

November 10, 2018

# Shri Hanumachchaturvimshatih

# શ્રીહનૂમચ્ચતુર્વિંશતિઃ

## Sanskrit Document Information

Text title : hanUmachchaturviMshatiH

File name : hanUmachchaturviMshatiH.itx

Category : hanumaana, sachchidAnanda-shivAbhinava-nRisiMhabhAratI, viMshati, hanuman

Location : doc_hanumaana

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

November 10, 2018

*sanskritdocuments.org*

# શ્રીહનૂમચ્ચતુર્વિંશતિઃ

યો બાલ્યેઽપિ દિનેશં પ્રોદ્યન્તં પક્વદિવ્યફલબુદ્ધ્યા ।
વ્યુદપતદાશુ હિ પુષ્કરમાદાતું નૌમિ તં સમીરસુતમ્ ॥ ૧॥

યસ્મૈ ભગવાન્બ્રહ્મા પ્રાયચ્છદ્વાયુતૃપ્તયે પૂર્વમ્ ।
વિવિધાન્વરાન્વરાંસ્તં વન્દે દુર્જ્ઞેયદિવ્યમહિમાનમ્ ॥ ૨॥

સુરસાવદનં વિપુલં તરસા ગત્વા વિનિર્ગતં દૃષ્ટ્વા ।
યં સુરનિકરા વિસ્મયમાજગ્મુર્નૌમિ તં મહાપ્રાજ્ઞમ્ ॥ ૩॥

લઙ્કાપુરાધિદૈવતગર્વં વેગાચ્ચપેટિકાદાનાત્ ।
નિર્મૂલં યશ્ચક્રે વન્દે તં વાયુસૂનુમમિતબલમ્ ॥ ૪॥

ગોષ્પદવત્સરિતાંનિધિમુલ્લઙ્ઘ્યાશોકવિપિનગાં સીતામ્ ।
અદ્રાક્ષીદ્ભયરહિતો યસ્તં પ્રણમામિ શિંશુપામૂલે ॥ ૫॥

રામાદેશશ્રવણાનન્દાદુદ્ધૂતશોકગન્ધાં યઃ ।
સીતાં ચક્રે મતિમાંસ્તમહં પ્રણમામિ શોકવિચ્છિત્ત્યૈ ॥ ૬॥

યોઽક્ષકુમારપ્રમુખાન્ પ્રવરાન્દનુજાઞ્જઘાન કુતુકેન ।
એકઃ સહાયરહિતસ્તમહં પ્રણમામિ ગન્ધવહસૂનુમ્ ॥ ૭॥

પ્રાપ્ય મણિં સીતાયાઃ કાનનમસુરસ્ય સત્વરં ભઙ્ક્ત્વા ।
દગ્ધ્વા લઙ્કાં યોઽગાદ્રઘુવરનિકટં સ મામવતુ ॥ ૮॥

સીતાપ્રોદિતવચનાન્યશેષતો યો નિવેદ્ય રઘુવીરમ્ ।
ચક્રે ચિન્તારહિતં વન્દે તં ચિન્તિતાર્થદં નમતામ્ ॥ ૯॥

સમરે વક્ષસિ યેન પ્રહતઃ સંમૂર્છિતઃ સસંજ્ઞોઽથ ।
પ્રશશંસ રાવણો યં તમતિબલાનન્દવર્ધનં નૌમિ ॥ ૧૦॥

ઓષધિગિરિમતિવેગાદ્ધૃત્વાઽઽનીય પ્રવૃદ્ધદિવ્યતનુઃ ।
યો લક્ષ્મણાસુદાનં ચક્રે તં નૌમિ ગરુડનિભવેગમ્ ॥ ૧૧॥

રઘુપતિમુખારવિન્દસ્રવદાગમશીર્ષતત્ત્વમકરન્દમ્ ।
આપીયાગલમનિશં નન્દન્તં નૌમિ પવનમૂલધનમ્ ॥ ૧૨॥

કનકાદ્રિસદૃશકાયં કનકપ્રદમાશુ નમ્રજનપઙ્ક્તેઃ ।
રક્તામ્બુજાસ્યમીડે સક્તાન્તઃકરણમિનકુલોત્તંસે ॥ ૧૩॥

કારુણ્યજન્મભૂમિં કાકુત્સ્થાઙ્ઘ્ર્યબ્જપૂજનાસક્તમ્ ।
કાલાહિતભયરહિતં કામવિદૂરં નમામિ કપિમુખ્યમ્ ॥ ૧૪॥

કુણ્ડલભાસિકપોલં મણ્ડલમઙ્ઘ્રિપ્રણમ્રજન્તૂનામ્ ।
કુર્વન્તમીપ્સિતાર્થૈઃ સર્વૈર્યુક્તં ભજેઽઞ્જનાસૂનુમ્ ॥ ૧૫॥

નયનજિતહેમગર્વં નયનયપારીણમઞ્જનાતનયમ્ ।
ગતિવિજિતજનકકીર્તિં મતિમતિનિશિતાં દદાનમહમીડે ॥ ૧૬॥

પુરતો ભવ કરુણાબ્ધે ભરતાગ્રચરણલગ્નચિત્તાબ્જ ।
હર મમ નિખિલાં ચિન્તાં કરજિતપાથોજ કલિતવટુરૂપ ॥ ૧૭॥

રવિસુતમન્ત્રિવરેણ્યં પવિતાડનસહનદક્ષદિવ્યહનુમ્ ।
કવિશિષ્યહરણચતુરં સવિતૃવિનેયં નમામિ વાતસુતમ્ ॥ ૧૮॥

વક્ષસ્તાડિતશૈલં રક્ષઃપતિસૈન્યમર્દનપ્રવણમ્ ।
રક્ષાકરં નમસ્યામ્યક્ષાધિપદૂતમનિલપુણ્યચયમ્ ॥ ૧૯॥

સુરદેશિકસદૃશગિરં કરજૈર્હીરસ્ય કઠિનતાગર્વમ્ ।
નરશૃઙ્ગતાં નયન્તં નરમનિશં નૌમિ વાદ્યમનિલસુતમ્ ॥ ૨૦॥

શ્રીપારિજાતપાદપમૂલે વાસં કરોષિ કિં હનુમન્ ।
અધ્યેતુમવનતાખિલવાઞ્છિતદાતૃત્વમવનિજેડ્દૂત ॥ ૨૧॥

પુરદગ્ધારં મનસિજજેતારં ભક્તમન્તુસહનચણમ્ ।
ત્વામીશાનં કે વા ન બ્રુવતે બ્રૂહિ વાયુસૂનો મે ॥ ૨૨॥

પુરદગ્ધારં મનસિજજેતારં રામનામરુચિવિજ્ઞમ્ ।
હનુમન્ભવન્તમીશં વદતિ ન કઃ પ્રણતસર્વદોષસહમ્ ॥ ૨૩॥

સહમાનાપરમૂર્તે સહ માનનાન્મમ મન્તૂન્ ।
પવમાનપુણ્યરાશે પ્લવમાનાબ્ધૌ નમામિ તવ ચરણૌ ॥ ૨૪॥

ઇતિ શૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતા શ્રીહનૂમચ્ચતુર્વિંશતિઃ સમ્પૂર્ણા ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*Shri Hanumachchaturvimshatih*

pdf was typeset on November 10, 2018

Please send corrections to *sanskrit@cheerful.com*